केतकी-काव्यम्

32

श्रीरघुनाथचौधारिणा कविरत्नेन

विरचितम्

नलवारीसंस्कृत-महाविद्यालयाध्यक्षेण—

पण्डितश्रीमनोरञ्जनशास्त्रिणानूदितम्

श्रद्धास्पद पण्डित प्रवराणां
श्रीबलजिन्नाथ महाभागानां
करकमले प्रीत्या समर्पितम्
श्रीमनोरञ्जनशास्त्रिणा
७।२।६५ ई०

केतकी-काव्यम्

श्रीरघुनाथचौधारिणा कविरत्नेन

विरचितम्

नलवारीसंस्कृत-महाविद्यालयाध्यक्षेण—

पण्डितश्रीमनोरञ्जनशास्त्रिणानूदितम्

मूल्यम्—रूप्यकत्रयम्

Published by—
Shantaram Chowdhary, B. E.
Ujanbazar, Gauhati.

1st, Published
December, 1964

Price Rs. 3/-

Printed by—
R. R. Basak
Sreekanta Press, Pr. Ltd.
75, Baithakkhana Road.
Calcutta-9

PREFACE

Dr. Banikanta Kakati M.A., Ph.D.
(Translated from the original Assamese
by Prof. Tarini Kanta Bhattacharya, M.A.)

Shrijut Raghunath Chaudhary's is a familiar name in Assamese literature. His selfless devotion to literature is known to all. We have now got from his pen a bird poem, entitled "the Keteki", the like of which we did not have before. It is a very fine poem. A current of thought runs through the five sections into which the poem is divided, and there can be little doubt that readers will be caught in the waves of thought contained there in—

The central theme of the poem is the attainment of youth in animate and inanimate nature at the advent of the bird, the Keteki. The song of the Keteki is the echo of some peerless joy of a fuller world hitherto unknown to man. The voice of the Keteki is, as it were, a vernal breeze, no body knows from where it comes and in which direction it blows. The poet has not fully known the bird. To him the Keteki is "a voice, a mystery." The poem begins in this note of mystery and wonder :—

Wherefrom hast thou come, oh darling,
And whither dost thou fly,
Why dost thou wander about alone,
In lands far and wide ?

The first twenty verses deal with this query and the difference which exists between the bird's joy and the imperfect and unhappy world of man :—

Dost thou realise. oh bird,
In what cunning world art thou sojouring ?
Wily trap-setters here, with their wiles,
Will set a trap and catch thee by the neck !

The note of mystery continues and the poet's mind is troubled by doubts. He neither understands the bird nor does he find any link between the bird's song and the human world. He does not know whether the bird is singing a pensive song or it has brought some measage of happiness. At this his doubt disappears. He realises in emotion the essential truth :—

Thou hast come, like cherubim,
With a message of love,
This to scatter below.

With the eye of intense imagination the poet saw that wheresoever there is a ray of joy in this melancholy world, it is but the echo of the bird's song :—

With thy re-vitalising songs,
Thou hast made matchless oasis
Of deserts,
Where no life but burning sands existed.

The poet looks around and presently discovers that with the song of the Keteki the earth has become endowed with a new life and beauty.

The second section of the poem deals with this re-juvenation of the world. In solidity of thought and

artistry of poetic execution, the Assamese poet's performance is not inferior to the description of Spring given by Kalidasa in the Third Canto of Kumarasambhava. Besides, the subject matter of the Assamese poet has a wider range. In the Kumarsambhava, Spring enlivened only the hermitage in the Himalayas where Lord Shiva was in deep meditation ; but in the Assamese poet's description Spring enlivened hills and dales, men and beasts, birds and insects and even the wide waters.

The imageries employed by the poet are not conventional ones, borrowed from books or learnt from others. The poet collected them directly from his observation of Assamese life. These are familiar pictures of the Assamese country-side. These clearly disclose a keen power of observation on the part of the poet. The whole of the second section is replete with this peerless lustre, so much so that a few quotations from that section can not give an adequate idea of its beauty any more than a few flowers plucked from a garden can give an idea of the garden as a whole.

Below are given a few verses for specimens :—

> The Dahikatara bird has got your tune by heart.
> And in the intoxication of love.
> It if singing with an open heart.
> At the same time,
> It is dancing in various measures.
> From the water's edge down in the "Beel" (water),
> The "Dowk" bird joined the song.
> And it drew out melodious notes as well,
> From the Mewa and the Sarali birds.

It is needless to say that this description will raise echoes in the heart of every poetic reader. That is not all :—

And in that song of love,
The lean body of the ancient river,
The Brahmaputra,
Swelled up.
Oh, dear bird, sit thou on the tree,
Of the sandy bank,
And sing your song
A second time.

This imagery of the lean Brahmaputra swelling up is definitely an original imagery. To connect the river Brahmaputra of swirling Summer waves with the rest of the cosmos through the song of the Keteki is not the work of an ordinary poet. More attractive are the following :—

Hearing thy song, the bashful bride,
Stops midway in her loom,
Speechless she remains
The shuttle held idle in her hand.
The self-same song makes the village damsel
forget herself,
She stops spinning,
And the yarn-ball gets stuck in spinning wheel.

This is patriotism in literature. This is गोस्पदे नभोमण्डलम् । The little pool of water contained in a hoof-hole may reflect the boundless sky. Through pictures of Assamese country life, the poet throws some light on universal life. This is no mean orginality. It seizes on appropriate local

pictures to convey universal feelings. Only an inferior poet would here select, for example, a girl reading a novel or romance and say how as a result of the bird's songs she left off the book half-read. That would be neither appealing nor locally true. A poet draws pictures from out of the habits, manners and customs of the society in which he is born and for which he writes. When the bugle note of Krishna raised commotion in the minds of the milk-maids at Gokul, then—

> Some milk-maids were milking their cows,
> But they wept overwhelmed with charm.
> Some left off churning milk and went out.

And the milk pails were left-uncared for on the ovens. After the marriage of Indumati when the bridegroom and the bride entered the town of Vidarbha, the city women, out of overwhelming curiosity stood gazing—

> जालान्तरप्रेरितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
> नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ।

The Assamese girl's "holding the shuttle idle," the Gokul milk-maid's "leaving the milk uncared for on the oven", "the indifference of the town girl for her descending skirt"—all these belong to the same level of originality.

Another mark of power is the capacity of expressing the maximum amount of thought in the minimnm amount of words. The Assamese poet's "holding the shuttle idle," "the yarn-ball getting stuck to the spinning wheel", "the painted picture got dissolved in tears" and such other lines have quite as much power of communication as is possessed by such sentences of Kalidasa as "शैलाधिराजतनया न ययौ न

"तस्थौ" ॥ "चित्रार्पितारम्भ इवावतस्थे", "वाष्पस्तु ददात्येनां द्रष्टुं चित्रगतामपि, or such famous lines as Coleridge's "Like a painted ship on a painted ocean." On the whole this entire section is full of rare beauties.

In the Third Section the poet wants to be sure that his discovery of the world's re-juvenation is correct and so he casts a look back to ascertain if there was any manifestation of this type of joy in the past. With the help of imagination he saw that past too.

Sitting happily on the grassy lawns by the Malini,
Sakuntala had cherished a picture of her darling
Painted on lotus leaves.
But before she could put the colours up,
Waves of thought arose in her mind.
Tears rolled down her cheeks,
And the picture got totally dissolved.

Damayanti of Vidarbha, Usha Devi of Shonitpur, the newly wedded Yaksha of Alaka, and the milk-maids of Gokul—all were emotionally stirred by that same tune, all were deeply drenched in the sacred water of love and all surrendered themselves to their respective dear ones. Even the poem "Meghdoot" of Kalidasa was inspired by that same song :—

The song that brought the love-lorn Yaksha
To the hill Chitrakut,
Was that also the song that gave birth, in
the poet's mind.
To the "Meghdoot" ?

Like the Assamese poet, the English poet John Keat

also was delighted by bird-songs and he too felt a stir of the same life in the past :—

Perhaps the self-same song that found a path
Through the sad heart of Ruth, when sick for home.
She stood in tears amid the alien corn etc.

In the Fourth Section the poet discovered that the song of the Keteki had cast a spell of joy not only on the past and around immediate surroundings of the poet, but also had sent an inspired thrill over all time and space through which flows a universal life-current :—

Lightnings burst out in smile in thy song,
And clouds kiss one another when they float
Across the evening sky
At the song,
Milk-maids dance to tune,
And the Jumna reverses the current.

The doubt in the poet's mind as to whether the world of every day existence is true or the world opened-up by the bird's song is true—is now resolved. He overcomes "Maya" (illusion). He has noticed a fuller consciousness that pervades the universe. He is now ready to enter into

Like thee do I renounce.
This world of "Maya" (illusion).

But in the Fifth Section, quite unawares to the poet, a note of sadness re-enters :—

Even before I was fully aware,
A darkness descended on Nature
Without the Keteki, the world of dreams,
Grew empty again,

The "Keteki" is no new-found spring. Its origin can be traced back to the bird lyrics. "Sing Thou Once More, Oh, My Darling Bird," "The dear Bird" and the "Keteki Bird"— lyrics which were earlier published by the poet in a collection known as the 'Sadari.' From these early lyrics one can at once see that the mysterious beauty of bird-life had long exercised a spell on the poet's mind. These early lyrics contained, in an embryonic state ideas and beauty which have seen their flowering in the present long poem :—

Dost thou remember oh bird.
The banks of the Jumna
And their Kadamba trees ?
There didst thou sing is superb tones
And thereby maddened the women of Braja.
Sing thou, oh bird, in those tones to me.
Where didst thou learn to sing
The songs of love ?
That song of one idea,
That song of one tune.
Has made the hard world softer.

In the present poem, the long-cherished ideas of the poet have found expression in mature and concentrated beauty. What was originally a quest and a query, is no longer so. He has found some poetic answers and solutions. His poems show a gradual evolution of thought and attitude born of sustained devotion and poetic growth. Such devetion is not very common in Assamese.

Sd/- Banikanta Kakati.

Publisher's note :

Keteki was first published in the original (Assamese) in 1915. An English translation of the book was also published in 1961.

Necessity for a Sanskrit translation of the book was felt for long so that Oriental readers might have an access to the beauties of this exquisite bird poem.

Shri Monoranjan Shastry, Principal, Nalbari Sanskrit College (Kamrup) has very kindly come forward with this translation covering all the main current of thought of the poem. We are deeply grateful to Shri Shastry.

The preface, originally written by late Dr. Bani Kanta Kakati, the eminent Assamese Scholar-Critic, as a critical appreciation of the poem was attached to the second edition of Keteki. Prof. Tarinikanta Bhattacharyya of the Department of English, Cotton College, Gauhati, has very kindly rendered the same into English. We are thankful to him for the valuable help.

Gauhati,
19-12-64.

Shantaram Chowdhary

केतकी[1]

प्रथमस्तरङ्गः

---*---

कस्मात् कुतो वा ललिते त्वमागता
कां वा दिशं सम्प्रति गन्तुमीहसे।
उड्डीयमाना कथमेकला सती
बम्भ्रम्यसे दूरमहो विहायसा ॥१॥

१। 'केतकी' नाम पक्षिविशेषो यो वसन्तसमये कलं गायन्नितस्ततो भ्राम्यमाणो दृश्यते, असमीयभाषायां 'केतेकी'त्युच्यते।

विहाय लोकालयमेत्य निर्जनं
विहङ्गमे, लङ्घितलोकलोचनम् ।
किमाशया तेऽविदितार्थया कया
गिरा चिरं रौषि म बुध्यते मया ॥२॥

त्वया सुराणामपि दुर्लभं धनं
किमाहृतं कस्य कृते प्रदास्यते ।
अथ प्रशस्तं यदिहास्ति वस्तु तत्
किंनाम देशं प्रति नेतु मिष्यते ॥३॥

अलङ्‌घ्य-तुङ्गाचल-मूर्द्ध-चारिणी
विलापमाधुर्य्यमयं प्रगायसि ।
कदाचि दासाद्य नदीतटं पुन—
र्निस्तब्धता तस्य निरस्यते त्वया ॥४॥

माणिक्यमेकं हृदयस्य ते सखि,
काधाय शून्ये हृदये निधाय किम् ।
एकाकिनी भ्राम्यसि वा स्वयं कथं
त्वं प्रान्तभूमौ विजने वनेऽपि च ॥५॥

जातासि तन्मानवदृष्टिवर्जिते
सदा सलीलं किल देवयोषितः ।
रमन्ति यस्मिन् रमणीय-कानने
श्रद्धा दया शान्तिरथो विराजते ॥६॥

उद्यानपूरं सुरपारिजातकं
प्रेमात्मकं पुष्यति यत्र प्रत्यहम् ।
धीरं समीरोऽपि च यत्र सौरभं
वितीर्य्य प्राणान् खलु शीतलायति ॥७॥

प्रलोभनं नास्ति न यत्र पातकं
भयं न यस्मिन् नतरां विभीषिका ।
ज्योतिर्मयं पुण्यचयैर्विनिर्म्मितं
पुरं तदेकं प्रणय-प्रपूरितम् ॥८॥

दिव्यं सदानन्दमयं सनातनं ।
रूपातिगं यत्र गृहीत-विग्रहम् ।
विराजते त्वं विहगाङ्गने, कथं
विहाय देशं ननु तं समागता ॥९॥

सम्मोहिता केन विहङ्गि, हेतुना
सन्धीयते किं प्रति ते मनोगतिः ।
कथं विलापाकुल मञ्जु-कूजनै-
रितस्ततो यासि न वेत्सि मानवः ॥१०॥

त्वं पर्यहार्षीः पितरौ सहोदरान्
गृहं तथा पत्रचयेन निर्म्मितम् ।
स्वजन्मभूमिं विजहासि वा कुतः
किंनाम मन्त्रौषधतो वशीकृता ॥११॥

एषा मही नैव तु नन्दनं वनं
स्वर्गस्थितं नाप्यमरावतीपुरम् ।
अनेकधा पिच्छिलवर्त्मसङ्कुलं
स्थानं तदेतत् परमापदां पदम् ॥१२॥

जानासि किं पक्षिणि, रम्यकानने
मायामये त्वं रमसेऽत्र मोहने ।
मायाविनो मायिकवेशधारिणो
दद्यु गले ते ननु पाशबन्धनम् ॥१३॥

आतन्यते दुष्कृतकारि-लुब्धकैः
प्रलोभनं तत्र च मोहवागुरा
ततः सतर्कायत-दृष्टिशालिनी
विविच्य तत् खेचरि सर्व्वदा चरेः ॥१४॥

'अभीप्सितं भोजनमत्र लप्स्यते'
विचारयन्त्येवमहो विहङ्गमे ।
इहागता, त्वं बहुभिः प्रलोभनै—
र्नूनं मनस्ते खलु विप्रलप्स्यते ॥१५॥

निर्व्याजशुद्धः प्रणयो न लप्स्यते
त्वया नवास्मिन्नमृतोपमं सुखम् ।
को वक्ष्यति त्वां प्रति सादरं वचः
को वा प्रतीयात्तव दुःखवेदनाम् ॥१६॥

नन्वस्ति कश्चित् सुखदुःखयोर्जनः
समानभागी तव पक्षिमोहिनि ।
नूनं स देहार्द्धमिव त्वयाऽधुना
सहागतः किं खलु मे निवेदय ॥१७॥

बुभुक्षितां त्वां परिलक्ष्य वृक्षतः
को वाऽहरेत् स्वादु फलं सुशोभनम्।
तृषातुरां व्योमगजाह्ववी-जलं
कः पाययेत् त्वामिह दिव्य पक्षिणि ? ॥१८॥

श्रान्तां तथा क्लान्तिमतीं सुशीतले
त्वां शाययन् कः शयनेऽभिलालयेत्।
स्नेहेन कस्त्वामभिवीक्ष्य निद्रितां
मुखाम्बुजे चुम्बनमादधीत वा ॥१९॥

चिरं सुखेनैव जनेन जीवता
न शक्यते क्लेशभरेण जीवितुम्।
त्वयाऽपिलभ्यं बहुदुःख पीडनम्
नैयत्तयाऽख्यातुमलं तु मे वचः ॥२०॥

त्वमल्पसत्त्वा तव नैव भूयसी
शक्तिश्च देहे नितरां प्रबर्द्धते।
शक्तौ तु तस्यां प्रवहन्नहर्निशं
विश्वं प्रति प्रेमरसस्य निर्झरः ॥२१॥

लोके जगन्मङ्गल-साधनार्थिनी
गृहीतजन्मासि विहङ्गकन्यके।
त्वं पुण्यरज्ज्वा प्रणयात्मनैकया
जगत् समग्रं परिवेष्ट्य तिष्ठसि ॥२२॥

जगत् सिसृक्षुः प्रथमं प्रजापति—
स्त्वामेव यत्नादिव भूयसोऽसृजत्।
प्रेमामृतं स्वादयितुं जनानत—
स्त्वं देवदूतीव समागता भुवम् ॥२३॥

इतस्ततः कं जनमीक्षसे रहः
कण्ठप्रसारं ननु दीर्घदर्शिनी।
वियोगिनी कस्य नु यद्वियोगतो
विलीयते ते हृदयं तपस्विनि ॥२४॥

कस्य प्रवृत्तिर्दयिते, त्वयाऽहृता
केनाथ वाक्यं समुदाहरिष्यते।
त्वदीयवाणीं, हृदयं यया द्रवेत्,
निशम्य तां चित्तमथो व्यथाकुलम् ॥२५॥

वियोगवार्त्ता यदि कांचिदानये—
र्नश्रावयेस्तां स्वयमेव धारयेः ।
अथास्ति वार्त्ता मिलनस्य काचन
प्रगीयतां सा ललितस्वराश्रितम् ॥२६॥

प्राप्यैव भूमण्डलमाशु सागरम्
अमूमुदस्त्वं गिरिकाननान्यपि ।
सकृद्द्रुतेनामृत विन्दु वर्षिणा
जगत् समग्रं सममूमुदस्तथा ॥२७॥

न प्राणिनो यत्र च नैव मानवा
देशे मरुप्रान्तरगेऽप्यनुर्व्वरे ।
प्रगाय सञ्जीवन गान माहितं
त्वया मरूद्यान मनिन्द्य सुन्दरम् ।।२८।।

त्वया हि राज्ञीत्व मुपेत्य शोभने,
यत्प्रेमराज्ये विहितं तदद्भुतम् ।
सङ्गीतवर्षैरभिषिच्य सर्व्वथा
तारुण्यवेशैः प्रकृतिः सुसज्जिता ।।२९।।

पीयूषभाण्डं ननु विश्वमोहनं
लब्धं त्वया पक्षिणि कुत्र वा कथम्।
मर्त्यं जगद् येन च नीयतेऽमृतं
प्रवाहिता प्रेमतरङ्गिनी यतः ॥२०॥

श्रान्ताश्च पान्थास्तवगीतमाधुरीं
सन्धारयेयुर्हृदयेष्वितिस्थितम् ।
ते विस्मरन्तोऽखिलमध्वग श्रमं
गन्तव्यदेशं न चिरादवाप्नुयुः ॥२१॥

निशीथकालेऽप्यसहायमाशुगे,
विहायसाऽगत्य कुतो विदूरतः ।
प्रत्युत्थितैः पर्व्वत श्रृङ्गसङ्गमाद्
गीतिस्वनैर्बोधयसे जगज्जनान् ॥२२॥

अचेतनोऽहं खलु मोह निद्रया
निमज्जितोऽभूवमवोधवारिधौ ।
किं नामगीतेन ततः प्रबोधितो
ममान्तरात्मा कथमाकुलीकृतः ।।२३॥

मायागृहे स्वप्नविलासविभ्रमै—
विमुह्यतो गाढमलीकदर्शिनः ।
त्वदीयगीतश्रवणेन मे द्रुतं
शैथिल्यमाप्तं हृदयस्य बन्धनम् ॥३४॥

यद्यप्यहं मानवजन्म लब्धवान्
नीतिं च धर्मानपि मानवोचितान् ।
त्वदीयगीतैर्हृदये तु मेऽर्पितं
स्वर्गोचितं प्रेम जनानुरञ्जनम् ॥३५॥

वीणोत्थिते झङ्कृतिशालिनि स्वरे
वेणुस्वने वा सरितां कलध्वनौ ।
तवैव गानाश्रित तानमाधुरी
प्रचीयते प्रेमभरोपसम्भृता ।।३६।।

सत्स्वेव जीवेषु भवादृशेषु
प्रेमान्वितं वाक्यमिहास्ति लोके ।
स्निग्धं स्मितं वा सकटाक्षपातम्
आशा त्वमेवासि निराशिषोऽपि ।।३७।।

त्वं प्रेमशिक्षामिह मर्त्त्यलोके
प्रादा अपीप्योऽप्यमृतं च मर्त्त्यान् ।
द्रष्ट्वा तथा त्वामनु निर्म्मलेन्दु—
र्नक्षत्रमध्ये विहसन्निवास्ते ॥३८॥

इति श्रीरघुनाथ चौधारि कविरत्न कृते केतकी काव्ये
शास्त्र्युपनामाचार्य श्रीमनोरञ्जन मिश्र कृत—
संस्कृतानुवादे प्रथमस्तरङ्गः ॥०॥

———

केतकी

अथ द्वितीयस्तरङ्गः

प्राप्तो वसन्तः, सहकार-काननं
सकुट्मलं ते पनसाः सकोरकाः ।
त्वामेव द्रष्टुं मदमत्त-कोकिलः
सीमन्तवान् स्वादुवचा उपागतः ॥१॥

स कृष्णदेहोऽपि तथानुरागवान्
न लास्यवेषं कुरुते प्रसाधनम् ।
किन्तु प्रगायन् ललितं सपञ्चमं
तनोति किञ्चित् प्रणयापणं भुवि ॥२॥

त्वदीयगीतं मधुरं मनोहरं
निशम्य तन्वी तरुणी तु माधवी ।*
विलाससज्जां कुरुतेऽथशीतला
त्वया सहैता मलयान्मरुद्बधूः ॥३॥

---

* मधुमास = वैशाख ।

उद्यानमध्ये तरवस्तथा लता
नवाङ्कुरैस्ते नव पल्लवाञ्चितैः ।
श्यामं निकुञ्जं रचयन्ति सुन्दरं
यद्रूपयोगाद् वसुधा सुधायते ॥४॥

ताद‍ृङ् निकुञ्जालय-तोरणाश्रिता
याऽशोकवल्ल्यस्त्यनुरागरञ्जिता ।
विलास चोलाञ्चललुण्ठितैस्तया
सम्पूज्यसे पुष्प चयैश्च सज्जितैः ॥५॥

धीरं तु धीरेण समीरणेन तत्
प्रनर्त्यते श्यामल-चोलकाञ्चलम् ।
मनोहरं सूर्यकरेण दीप्यते
लोलायमानं मणिपुष्पसञ्चयम् ॥६॥

नानाविधैस्तत् कुसुमैस्तु कानने
सुगन्धिभिस्तत्र वितीर्य सौरभम् ।
निवेद्यते प्रेमसमादरश्च ते
सुगोपितो योहृदयस्य कन्दरे ॥७॥

निकुञ्जवल्लीकृत वेणिराजयो
विराजमानाः प्रतिवृक्षशीर्षकम् ।
तथा तृणानां हरितैर्दलैर्मिथः
समन्वितैः सज्जितमत्रमण्डपम् ॥८॥

निशाक्षये तत्र निसन्नया त्वया
प्रभातरागैर्गुणनाम गीयते ।
विभोः, सकुञ्जं कुसुमान्वितं वनं
तद्वैजयन्तश्रियमाप्नुते ततः ॥६॥

सा केतकीयं[1] तु तवैव सोदरा
कान्ता स्वपत्रावरणावगुण्ठिता ।
सरागमुद्घाट्य च मञ्जुषा मुखं
सर्व्वत्र संसिञ्चति प्रेम सौरभम् ॥१०॥

आमोदिताः सौरभवैभवेन तत्
सर्व्वा दिशो निर्जन काननं प्रति ।
समीरणे तद्गतमोद निर्भरो
धीरेतु धीरं क्रमशो विलीयते ॥११॥

१ । 'केतकी' पुष्पम् ।

सम्भूय भूयोऽपिच मत्त षट्पदाः
सम्मोहिताः पङ्कजलाभलोभतः ।
उड्डीयमानाः कलगुञ्जितान्विता
वंशिस्वनं स्निग्धमिव प्रकुर्व्वते ॥१२॥

या कामिनी[१] नाम मनोरमा सती
रागाभिरूपा सुमनाः कदाचन ।
मुक्तोरसं तामुपलभ्य पुष्पलिट्
लोभेन स प्रेममधूनि पीतवान् ॥१३॥

---

१ । 'कामिनी'—तन्नामपुष्पविशेषः ।

लज्जाभिभूता पतिता तपस्विनी
प्रादर्शयन्नान्यजनाय तन्मुखम् ।
तत् कानन श्यामल शाद्वलान्तरे
सा रौप्यखण्डप्रतिमास्ति साम्प्रतम् ॥१४॥

निशम्य गीतं तव काञ्चनाभिधा[२]
विकाशमेता सुमना मनोरमा ।
रक्ता सिता देवगृहाङ्गने यथा
रूपश्रिया विश्वमिदं विमोहितम् ॥१५॥

२। काञ्चनं' = पुष्पविशेषः । तच्च श्वेतकाञ्चनं रक्तकाञ्चनं चेति द्विधा भवति ।

सरोजिनीं त्वं विरहातुरामनु
तदीय-दुःखानुभवेन दुःखिता।
प्रभातगीतेन हि प्रेमिकं प्रति
प्रेम प्रवृत्तिं खलु दत्तवत्यसि ॥१६॥

योषा[१] शमेन प्रणयेन सम्भृता
रागारुणा, तन्नवदीधितिच्छटाम्।
अवाप्य लज्जावनता सरोजिनी
स्निग्धं सरागं कुरुते मृदु स्मितम् ॥१७

१। 'या ऊषा' इति सन्धिविच्छेदः।

निसन्नया निर्जनकुञ्जमण्डपे
यन्नामगीतं खलु पक्षिणि त्वया ।
तदेवश्रूत्वा गलितावगुण्ठना
क्षणादभूत् सूर्यमुखी[२] पतिव्रता ॥१८॥

वृक्षाग्रमासाद्य निशाल्पशेषिते
प्रभातगीतं तु प्रयोज्यते त्वया ।
सम्पद्यते रागतरङ्गसङ्गतं
निस्तब्ध विश्वं तु पुनस्तरङ्गितम् ॥१६॥

---

२ । 'सूर्यमुखी' पुष्पविशेषः ।
पुष्पमिदं दिवा पुष्पितं सूर्याभिमुखं तिष्ठति ।

तवैव कण्ठस्वर गीतसङ्गतिम्
अभ्यस्य नानाविध भङ्गिमान्वितम् ।
प्रेमप्रमत्ता "दधिकोटरा"[१] सती
प्रसारयन्ती हृदयं प्रगायति ॥२०॥

जलाशयान्ते च सरोवरान्तिके
दात्यूहको[२] रौति यदा कलं तदा ।
क्षणात्तदावेशवशात् समुद्गता
शरालि[२] कण्ठेऽमितगीतभङ्गितिः ॥२१॥

---

१ । 'दधिकोटरा' पक्षिविशेषः,—'दहिकतरा' इत्यसमीयाभाषा ।

२ । दात्यूहकः शरालिश्च
पक्षिविशेषौ 'दाउक'–'शराली'ति नाम्नैवासमीयाभाषायामपि प्रसिद्धौ ।

तवैवगान स्वरतान सङ्गतं
छन्दःसमेतं विविधा विहङ्गमाः ।
गायन्ति विष्णोर्महिमाभिवन्दनां
गिरौ पृथिव्यां गहने च कानने ।।२२।।

झिल्ली कलास्याऽपि तवैव सङ्गिनी
तवैव कण्ठस्वरतान सङ्गतम् ।
मध्याह्नकाले खलु गायतीह यत्
सन्तोष्यते पान्थजनस्य तेन हृत् ।।२३।।

ज्येष्ठा तवेयं भगिनी 'सखीयती'[1]
स्नेहान्विता रूपवती समागता ।
हारिद्रवर्णा सुभगा च मोहिनी
सुवेश-सीमन्त-विलास-सज्जिता ॥२४॥

काञ्चित् स्वयंनिर्म्मित-काव्यगायिका
सखी त्वदीया मदनेति-नामिका[2] ।
सलास्यमत्युच्चतरूनुपेत्य सा
बम्भ्रम्यते 'वैषुव'[3]-गीतगायिनी ॥२५॥

१। 'सखीयती' हरितवर्णपक्षिविशेषः—
एतद्देशस्यैव पश्चिमभागे पक्ष्ययं 'पाटमादै'=सं :—'पट्टमाधवी' उच्यते ।

२। 'मदना' पक्षिविशेषः, 'मयने' त्यसमीयाभाषा ।

३। 'वैषुवगीतम्'—'बिहुगीत' इत्यसमदेशप्रसिद्धम् ।

तद्गायिकाया हृदयं प्रवर्त्तते
तथा यथा प्रेमरसैः प्रपूरितम् ।
लयेन सा गायति किञ्चिदद्भुतं
येन द्रुतं जीवनमाकुलीकृतम् ॥२६॥

माधुर्य्यपूर्ण-स्वरबद्ध-कूजने
त्वयैव वन्या विहगाः सुशिक्षिताः ।
तथैव बालाः सुमनःकुमारिका
आस्यावरोन्मोचन-पूर्व्वकेक्षणे ॥२७॥

शैलोद्भवा शैवलिनी तवैव तद्-
गीतं निशम्योच्चलभङ्गसङ्गता ।
शैवालभूमौ नितरां प्रयच्छति
प्रेमप्रवाहं हृदयस्य वैभवम् ॥२८॥

तत्प्रेमगीतश्रवणान्महात्मनः
क्षीणस्य बृद्धस्य विधातृजस्य[1] च ।
स्फातिस्तु काचिदुपजायते तनौ
प्रगीयतां सैकतवृक्षतः पुनः ॥२६॥

१ । विधातृजो = ब्रह्मपुत्रो = लौहित्यो नद इति यावत् ।

पुरातनेनापि वटद्रुमेण तु
श्रुत्वा त्वदीयं मधुसङ्गतं रुतम् ।
जलेन देहादपनीय कर्द्दमं
यज्जीर्णपत्रं परिवर्त्तितं मुदा ॥३०॥

सुशीतले श्यामलवृक्षसंश्रिता-
वनातपेऽपूर्व्वसुखोपविष्टया ।
वितीर्य्य मर्त्त्येष्वमरावतीसुधां
सम्मोहिता भूतलवासिनो जनाः ॥३१॥

गीतध्वनेस्ते प्रतिपल्लवं ततः
सम्पद्यते यत् प्रणयाङ्कुरोद्गमः ।
स्वरूपविम्वं प्रसमीक्ष्य निर्म्मले
जले तदावेशवशाद् विमुह्यति ॥३२॥

श्रान्ताश्च पान्थास्तवगीतमूर्च्छनां
सन्धारयन्तो हृदयात्मवीणया ।
श्रमापनोदं वटमूल आसते
आलोचयन्तः किमपि स्वचेतसा ॥३३॥

गीतं त्वया यल्ललितं लयान्वितं
विभोगुंणाढ्यं 'पुरवी' स्वरेण तु ।
सर्व्वा दिशः प्रेमतरङ्गितास्ततो
भक्तस्य प्राणाः किल शीतलीकृताः ॥३४॥

एकैकशो दृष्टिपथं समागतै—
र्यत्क्षुद्रनक्षत्रचयैर्नभस्तलम् ।
विचित्र-पुष्पाकृतिकल्पितोज्ज्वलं
यथा वितानं विततं विमानतः ॥३५॥

स्निग्धा त्वियं दीप्यति पूर्णिमा निशा
जगत् समग्रं किमु चन्द्रिकाप्लुतम् ।
तथा त्वदीयादपि कूजनध्वनेः
सुधाप्रवाहो वहतीव भूतले ॥३६॥

माधुर्य्यपूर्णान्मधुकण्ठतस्तु ते
सङ्गीतमाधुर्य्यमिदं प्रवर्त्तते ।
माधुर्य्यमेवं मधुरेण सङ्गतं
मधुप्रभूतं रमते च माधवी ॥३७॥

या माधवी प्रेमवती सुमध्यमा
श्रुत्वा रुतं ते मधुयामिनीषु सा।
देहावलम्बीकृतचूतयष्टिका
हसत्यहो यल्ललितं सुधासितम् ॥३८॥

निर्व्याजमुग्धा किल चम्पकाभिधा
मुखादपास्यावरणं तु वल्लरी।
कपोलयुग्मं हरितालरञ्जितं
विधाय किञ्चिद् वदतीव हृद्गतम् ॥३९॥

तारुण्य-रागोल्लसितस्तु केसरः
सस्नेह-नेपथ्यमनोहरो युवा ।
गीतप्रयोगाय समाह्वयत्यसौ
त्वामेव सङ्गीतकलातिलालसः ॥४०॥

मुक्ताफलाभैस्तु तुषारविन्दुभि-
र्यन्मल्लिकापुष्पदलैर्विहस्यते ।
ततश्च धीरं किल भूतलं प्रति
शान्तिप्रवाहो वहतीव साम्प्रतम् ॥४१॥

ह्रदस्य वक्षस्तलतः कुमुद्वती
चलत्तरङ्गोल्लसिताकृतिः सती।
नीलाञ्चलं किञ्चिदपास्य शीरसः
स्निग्धं सलीलं मधुरं हसत्यसौ ॥४२॥

प्रहेलिकाशालिनि शाम्बरीमये
त्वदीयकण्ठे खलु विश्वमोहिनी।
सम्पद्यते मोहनरूपसज्जया
शोकश्च प्रीतिश्च समं प्रगीयते ॥४३॥

निस्तब्धमासाद्य च मध्ययामिनीं
कदाचिदुन्मादकरैः स्वरैस्त्वया ।
प्रगीयते किं ननु कैर्विमोहनै-
र्वानै रथाङ्गस्य तु मर्म्म भिद्यते ॥४४॥

स चक्रवाको दयितावियोगत-
उन्मत्तवद् यो नितरां प्रवर्त्तते ।
कण्ठप्रसारं दयिताभ्रमादिव
त्वामेव मुग्धः सुतरां निरीक्षते ॥४५॥

त्वया प्रगीतां तु वियोगगीतिकां
निशम्य तां प्रोषितभर्त्तृकाः खगे।
पत्युः स्मरन्त्यो मनसाऽथ किंविधां
गतिं गतास्तन्न मयाऽधिगम्यते ॥४६॥

याऽभूत्तदा प्रेमकथा सुखं च यत्
प्रीतिश्च यादृङ् मिलनं च यद्विधम्।
तेषां स्मृतिः कैस्तु प्रबोधिता स्वरैः
तन्त्रीषु सस्नेह-हृदाततासु मे ॥४७॥

किंनाम गीतं ननु पक्षिकन्यके
प्रगीयते प्राणमनोहरं त्वया ।
यद्गानतानश्रवणात्तु सर्व्वथा
वियोगिनीनां हृदयं व्यथाकुलम् ॥४८॥

त्वदीयगीतश्रुतिमात्रतो मनः
प्रेमाहतानां किमिवानुभूयते ।
उन्मज्जते किंविधभावसंप्लवे
किंध्यानसक्तं तदशक्यवर्णनम् ॥४६॥

लज्जावती बालवधूस्तु तद्रुतं
श्रुत्वैव वासोवयनं जहात्यसौ।
बेमा करे सन्धृत एव वर्त्तते
मुखे च वाक्यस्फुरणं न जायते ॥५०॥

तेनैव गानेन च ते कुमारिकाः
सम्मोहिता आत्मनि यान्ति विस्मृतिम्।
यन्त्राहिता या त्रसरान्तकाष्ठिका[1]
तत्रैव लग्ना ह्यवतिष्ठते ततः ॥५१॥

---

[1] 'त्रसरा' सूत्रवेष्टनी 'महुरा' इत्यसमीयभाषा।

व्याचक्षते रागपरीतमानसाः
प्रीत्या मिथः प्रेमकथास्तथा पथा ।
गच्छन्ति मुग्धा युवतीजना जलम्
आहर्त्तुं कामा किल हंसगामिनः ॥५२॥

ग्रामान्तवृक्षं गतया त्वया तत्
किं नाम गानं रहसि प्रगीतम् ।
आवेगपूर्णस्वरबद्धतानं
प्राणास्तु येनाकुलिता भवन्ति ॥५३॥

इति श्रीरघुनाथचौधारिकविरत्नकृते
केतकीकाव्ये शास्त्र्युपनामाचार्य-
श्रीमनोरञ्जनमिश्रकृत-संस्कृतानुवादात्मके द्वितीयस्तरङ्गः ॥०॥

केतकी

तृतीयस्तरङ्गः

कन्वाश्रमे पूर्व्वमसौ शकुन्तला
देवी स्थिता पुष्पवने मनोहरान्।
संगृह्य नानाविध-पुष्पकोरकान्
कुर्व्वन्त्यभूत् कञ्चन चारुगुत्सकम् ॥१॥

त्वदीय-गीतश्रवणात् स गुत्सकः
तदा त्वतिष्ठत् चिरमर्द्ध निर्मितः ।
तथोन्मना सा वत ! मोहमागता
दीनाऽपि किञ्चिल्ललितं व्यराजत ॥२॥

दूर्व्वासनस्था किल मालिनी-तटे
सुखेन सा प्रेमपरीत-मानसा ।
प्राणोपमं तत्प्रणयार्थिनं जनं
समालिखत् तं नलिनीदले तदा ॥३॥

प्रागेव तद्वर्णकरागदानत-
स्त्वया तु तस्या मनसि व्यधीयत ।
चिन्ताप्रवाहोर्म्मिरथापि तद्दशा-
दालेख्यकं नेत्रजलैर्व्यलीयत ॥४॥

अथानसूयाऽप्यपरा प्रियंवदा
प्राणोपमं यन्मुनिकन्यकाद्वयम् ।
ताभ्यां सखीभ्यां बहुशः प्रबोधिता
तथापि नाविन्दत चेतसा शमम् ॥५॥

प्रफुल्ल-युथीस्तवकस्तु कानने
समन्ततो नीरसतामुपागतः ।
स गुत्सकश्चापि तयार्द्ध निर्म्मितः
क्वचित् कदाचिद् गलितो ऽलक्षितः ॥६॥

देवी तु सा स्वामिवियोग-पीडिता
श्रुत्वा त्वदीयं मधुरं रुतध्वनिम् ।
मानापमाने परिहृत्य सर्व्वथा
जगाम राज्ञो भवनं स्वयं ततः ॥७॥

उपेक्षिता राजकुलेऽवमानिता
निशम्य राज्ञो वचनं च लज्जिता ।
तथा विशीर्णाऽवयवाऽभवत् सती
यथैव शीतप्रहता कुमुद्वती ॥८॥

ततः परं साप्सरसस्तु कन्यका
शुचा प्रयाताऽप्सरसां निकेतनम् ।
पतिव्रता तद्विरहातुरा सती
चिरं पतिध्यानपरायणाऽभवत् ॥९॥

तद्देशमागत्य कुतोऽपि दूरतो
यत्प्रेमवेणुध्वनितं त्वया कृतम् ।
तदैव तस्या विरहार्त्तचेतसि
प्रेमानुरागः पुनरुत्थितः स्वयम् ॥१०॥

प्राणावसादैरथ कातरा सती
त्वामेव दीना शरणं जगाम सा ।
दौत्येन वार्त्ताहरणार्थमात्मनो
मनोगतं ख्यापयितुं प्रियाय च ॥११॥

स्तवेन देव्याः परितुष्टचित्तया
त्वया तु राज्ञो भवनं विहङ्गमे।
उपेत्य काऽगीयत प्रेमरागिणी
केनाथवा प्रेमवति, स्वरेण सा ॥१२॥

निदारुणेनाप्सरसः कुमारिका
राज्ञाऽभवद् येन चिरं सुविस्मृता
राजानमस्या विरहस्य वेदनां
न्यवेदयस्त्वं ललितस्वरेण तु ॥१३॥

प्रागेव देव्याः प्रणयस्य निष्क्रयं
राजर्षिणाऽदायि यदङ्गुरीयकम् ।
दुष्यन्तनाम्नो नृपतेस्तदीक्षणा-
दभूदभिज्ञानमथ प्रियां प्रति ॥१४॥

पुरा प्रदत्ता किल या प्रतिश्रुतिः
सोद्बोधिताऽभूद्धृदये महीपतेः ।
ततो गृहीत्वा हृदयेन तां सतीं
प्राणप्रियां सादरमभ्यपूजयत् ॥१५॥

अव्याहता कञ्चुकिनो यथा गति-
स्तथैव ते प्रेमपुरेऽपि सर्व्वदा।
सुखान्विता नायक-नायिका मिथ-
स्तदिङ्गितेन प्रणयाभिसारिणः ॥१६॥

पुरा त्वया नैषधराजकानने
गीतं यदा तच्छ्रुतिगोचरीकृतम्।
यूनो नलस्य त्वसवः प्रकम्पिता
विदर्भकन्याप्रणयार्थिनोऽभवन् ॥१७॥

दौत्येन वैदर्भपुरं समागतो
हंसोऽवदद् राजसुतस्य संस्तवम् ।
तद्रूपलावण्य-वशीकृता सती
सा राजकन्या हृदयं समपयत् ॥१८॥

तद्गीतमाकर्ण्य सुराश्च किन्नरा
मुह्यन्ति गन्धर्वगणाश्च दानवाः ।
पुरी धनेशस्य तु याऽलकाभिधा
तत्रापि तस्योत्थितवान् प्रतिध्वनिः ॥१९॥

न कालभेदः परिचीयते त्वया
संसारनीतिश्च तथा न बुध्यते ।
गायन्त्यथाजीजगरः प्रियास्मृतिं
किं-कुक्षणे पक्षिणि, यक्षचेतसि ॥२०॥

प्राणप्रिया-सङ्गसुखं च दर्शनं
यत् कोमलोष्ठाधर-निर्गतं वचः ।
स्मृतं वियोगातुर-गुह्यकस्य तु
व्यद्रावयत् तद्धृदयं सुकोमलम् ॥२१॥

यक्षः कदाचित् प्रियसङ्गमोहितः
पुराऽकरोत् स्वाधिकृतावहेलनम् ।
स स्वामिशापेन ततस्तिरस्कृतो
वहिस्कृतश्चाप्यलकाख्यधामतः ॥२२॥

शापाभिभूतस्तु दिनानि कानिचित्
तद्रामगिर्य्याश्रममध्युवास सः ।
पितुः प्रतिज्ञामनुपालयन् पुरा
यत्रावसद्दाशरथिः कदाचन ॥२३॥

तत्रास्ति धौताचलपाददेशकं
सरोवरं स्वच्छजलं मनोहरम् ।
यत्र स्थिते स्निग्धजले सुशीतले
सस्नौ सती पुण्यवती च जानकी ॥२४॥

सौन्दर्यमाला-परिभूषितं तु तत्
लतावितानैस्तरुपंक्तिभिस्तथा ।
स्थानं यथा पर्वतकण्ठलम्बिता
ललन्तिका स्वर्णमयी विराजते ॥२५॥

विभिन्नतानं विविधैश्च पक्षिभि-
स्तव स्वरेणैव समं प्रगीयते ।
उद्यम्य कर्णौ मृगशावकास्तु ये
शृण्वन्ति तन्निश्चलभावमाश्रिताः ॥२६॥

सौन्दर्यमेतत् परिदृश्य गुह्यको
निर्वासितो मोहमितोऽपि चिन्तयन् ।
तस्य प्रियायाः स्मृतयस्ततः परम्
एकैकशश्चित्तपटेषु जागृताः ॥२७॥

आषाढमासस्य तदादिमे दिने
गिरेर्नितम्बात् क्रमशः समुद्गतम् ।
प्राचीं प्रति प्रस्थितमम्बरोपरि
मेघस्य खण्डं घनकृष्ण-वर्णकम् ॥२८॥

प्रिया-वियोगोत्थित-रौद्रतापिते
यक्षस्य दग्धे हृदयात्मके मरौ ।
आशा-पयोविन्दुनिसेचनात् पुनः
समुद्गतः प्रेमतरोर्नवाङ्कुरः ॥२६॥

कृताञ्जलिः सन् किल गुह्यकस्तदा
सम्बोध्य मेघं सकलं मनोगतम् ।
न्यवेदयद् येन स प्रेयसीं प्रति
जगाम दौत्येन ततो बलाहकः ॥३०॥

उड्डीय मेघेन सहैव सङ्गता
समागता सत्यलकापुरीं प्रति ।
त्वं प्रेमिकायै विरहातुरस्य तत्
प्रियस्य सन्देशमथो न्यवेदयः ॥३१॥

अपूर्वतान-श्रवणेन तत्क्षणा-
दुज्जीविताऽभूदिव यक्षकामिनी ।
प्राणेषु तस्याः प्रियसङ्गमोद्गतः
प्रीतिप्रवाहोऽपि तरङ्गितोऽभवत् ॥३२॥

आशालहर्य्युच्चलिता तदाऽभवत्
प्राणेषु हर्षोऽप्यवधिं न लब्धवान् ।
अथोदतिष्ठत् परिलब्धचेतना
विहाय शय्यां विरहातुरा प्रिया ॥३३॥

तस्या जवाभं वत ! लोचनद्वयम्
अहर्निशं रोदनयोगतोऽभवत् ।
श्रुत्वा रुतं ते समपद्यत द्रुतं
वीतज्वरं शान्तमथापि तन्मनः ॥३४॥

का नाम शक्ति र्ननु तेऽस्ति मोहिनी
कण्ठस्वरे तेऽमृतबिन्दुवर्षिणि ।
जगज्जितं येन विहङ्गमे त्वया
प्रत्येकभावान्वित-मोहनस्वरैः ॥३५॥

यक्षस्तथा यक्षवधूः परस्परं
विच्छेदतो जर्जरितौ बभूवतुः ।
पीयूषकण्ठस्त्रुत-गीतभङ्ग्‌ते-
र्यन्नष्टवित्तं पुनरध्यगच्छताम् ॥३६॥

माधुर्य्यपूर्णं किल ते सुकण्ठतः
समं द्वयोरेव वियोग-योगयोः ।
गीतं समुद्‌गच्छति पुष्पितं यथा
प्रेमप्रसूनद्वयमेकवृन्तके ॥३७॥

पृच्छामि ते किञ्चन पक्षिकन्यके
मा विप्रलब्धा वद मे सदुत्तरम् ।
किन्नाम सम्मोहनमन्त्रयोगत-
स्त्रैलोक्यमेतत्तु विमोह्यते त्वया ॥३८॥

यद्गानमाकर्ण्य मुनेस्तदाश्रमः
उन्मज्जितश्चापि निमज्जितोऽभवत् ।
स्वरेण तेनैव ततो महाकविः
शाकुन्तलं कल्पितवान् सुनाटकम् ॥३९॥

यन्नाम गीतं विरहार्त्त गुह्यकः
श्रुत्वागमद् रामगिरिं ततः परम् ।
स्वरेण तेनैव विकाशमध्यगात्
तन्मेघदूतं कविकल्पना-जले ॥४०॥

स्वरेण तेनैव तथा मनोहरं
प्रेमावदातं किल रूपकद्वयम् ।
आलोडयन् ज्ञानपयोनिधिं कविः
सौन्दर्यलुब्धस्तु समुद्दधार यत् ॥४१॥

अतीत्य चिन्तां मम वर्त्तसे खगे
त्वां नैव जाने परिचीयसे न वा ।
ऐशीव शक्तिस्तु मयानुभूयते
काचित्त्वदीये हृदयेऽल्पमानके ।।४२।।

कदम्बवृक्षाद् यमुनाकुले त्वया
प्रवाहितः कः खलु प्रेमनिर्झरः ।
शिशुर्हरिर्यैन च मातृसन्निधौ
त्वां लब्धुकामस्त्वभिमानमाश्रितः ।।४३।।

तस्मात् सगीतं किल नीपपादपात्
त्वमुत्पतन्ती, बहुशोऽपि सादरम् ।
यशोदया नन्दसमेतयाऽर्थिताऽ—
हूता पुनश्चापि न दृष्टिमागमः ॥४४॥

कृष्णस्त्वसौ कीदृगबोधबालको
भूयो यदा क्रन्दनमाततान सः ।
स्नेहेन माताऽखिल-विश्वमोहिनीं
निर्म्माप्य तस्मै मुरलीमुपाहरत् ॥४५॥

स्वरेण तेनैव यमस्वसुस्तटे
समुत्थितं मोहनवेणुनिस्वनम् ।
वृन्दावनं सर्व्वमथापि सर्व्वतः
उन्मज्जितं प्रेमतरङ्गसङ्गतः ।।४६।।

लज्जापमाने परिहृत्य गोकुले
गोपास्तथा गोपबधूजनाश्च ये ।
निमज्जिताः प्रेमजले समन्ततः
प्राणांस्ततः कृष्णपदे समादधुः ।।४७।।

त्वदीय-गानेष्वथ वेणुनिस्वने
गूढाभिसन्धिर्ननु काचिदस्ति यत् ।
तदेकरज्ज्वा सुनिबद्ध्य गोपिकाः
संरक्षितास्तास्तु सहस्र-षोडशाः ॥४८॥

अये ! सुकण्ठे तव पक्षिणि स्वरः
को वा जगन्मोहकरः प्रवर्त्तते ।
न ज्ञायते येन तु गानतानतः
प्रकम्पिता वाणपुरी तदाऽभवत् ॥४६॥

निशीथकाले किल दीपकस्वरै—
गीतं त्वया प्रेमसुधाप्रसारि यत् ।
ऋजुस्वभावा सुमनःसुकोमला
सोषा कृता तेन विमोहितेन्द्रिया ।।५०।।

सा स्वप्नराज्ये दयितं स्मराङ्गजं
दृष्ट्वा कुमारं खलु वातुलाऽभवत् ।
'कथं नु लभ्या हृदयेष्टदेवता'
तत् चिन्तयन्त्येव तथाऽनयद्दिनम् ।।५१।।

सख्याः समाश्वासवचो यदाऽश्टणोत्
प्रतिश्रुतिं च प्रणयस्य साधने ।
सञ्जीवितात्मा किल साऽभवद् यथा
शुष्के मरौ लब्धपयःकणो जनः ॥५२॥

तद्गीतिकाया लहरी शनैः शनै—
र्द्वारावतीं प्राप्य ततो व्यलीयत ।
अथापि तस्मिन् हृदयप्रशान्तिकृत
प्रेमापणं किञ्चिदिव प्रसारितम् ॥५३॥

स्वरेण येनामरलोकवासिनो
मर्त्यस्थिता वाऽपि च प्रेमबन्धनम् ।
गच्छन्ति तेनैव तु पक्षिणि त्वया
तदाऽनिरुद्धोऽपि विमोहितो युवा ॥५४॥

सा चित्रलेखेति सखी पटीयसी
द्वारावतीं कञ्चुकिवेषमाश्रिता ।
गता तथोषा-हृदयेश्वरं ततः
समानयत् प्रेमरसेऽप्यमज्जयत् ॥५५॥

सा देवदूती खलु चित्रलेखिका
दाम्पत्यप्रेम्णा समयोजयद्द्वयम् ।
एकस्तदा प्रेमरसस्य निर्झरः
प्रवाहितोऽभूद्धृदयद्वयं प्रति ॥५६॥

क्षुद्रं त्वदीयं हृदयं तदेतत्
प्रेमाकरः प्रेमपयोनिधिश्च ।
प्रेमोर्म्मिमालोद्गमदत्तताल-
मापीपदः शान्तिमयं जगत्त्वम् ॥५७॥

इति श्रीरघुनाथ-चौधारि-कविरत्नकृते केतकी-काव्ये
शास्त्र्युपनामाचार्य-श्रीमनोरञ्जनमिश्रकृत—
संस्कृतानुवादात्मके तृतीयस्तरङ्गः ॥०॥

———

अथ चतुर्थस्तरङ्गः

सत्यं त्वमेकैव हि मर्त्यमण्डले
महार्हरत्नस्य खनिः समन्ततः।
कण्ठात्मक-प्रेमसुधापयोधितः
सदा समुत्तिष्ठति रत्नसञ्चयः ॥१॥

कीयज्जनेभ्यः परिवेषिता त्वया
ज्योतिर्म्मयी प्रेमकणाऽथ लप्स्यते ।
कीयज्जनैर्वा, प्रकृतिस्त्वया विना
घोरान्धकारेषु निमज्जिता भवेत् ॥२॥

यत् शाश्वतं प्रेम प्रवर्षितं त्वया
कदाऽपि नैतद् विलयं गमिष्यति ।
निपीय तच्छान्तिजलं ततो जनो
विना श्रमं वैतरणीं तरिष्यति ॥३॥

गीतेषु ते प्रेममधु प्रवर्त्तते
भवन्ति मत्तास्त्वथ प्रेमिणो जनाः ।
नृत्यन्ति तद्गीतवशात्तु गोपिका
यमस्वसा विपरीतप्रवाहिणी ॥४॥

त्वदीयसङ्गीतलये तु किञ्चन
पवित्रचित्रं प्रणयस्य विद्यते ।
सन्ध्यासु मेघो गगने सुसञ्चरन्
सन्दृश्यते यत्र तु वातवारिधौ ॥५॥

त्वदीय गीताद्धसति क्षणप्रभा
परं परं मेघमथापि चुम्बति ।
आकाशमार्गे रथमध्यचारिणी
त्वामीक्षमाणेव ततोऽपि लक्ष्यते ॥६॥

सङ्गीततस्ते लयलास्यशालितो
नृत्यन्ति पिच्छप्रसरं शिखण्डिनः ।
तवैव गीतान्मधुरं हसन्ति ताः
प्रोद्भासयन्त्यो गगनं तु तारकाः ॥७॥

त्वदीयसङ्गीतवशान्नवोक्तं
श्यामैस्तृणैः क्षेत्रमथो विराजते।
त्वदीयगीतात् कुमुदं च पङ्कजं
नक्तन्दिवं तिष्ठति पुष्पितं जले ॥८॥

त्वदीय-सङ्गीतवशाद् गतश्रमा
भवन्ति लोकाः क्षुधयाऽपि वर्जिताः।
मायाप्रभावोऽपि न वर्त्तते ततः
संसारशोको नितरां प्रशाम्यति ॥९॥

सङ्गीततस्ते जनता विमोहिता
आत्मानमेवाथ न तु स्मरन्ति ताः ।
पाषाणचित्तं द्रवतेऽथ तादृशो
जनः समाप्नोत्यमरस्य जीवनम् ॥१०॥

गानस्य तत्प्रेममधुप्रपूरितं
तानं महाविश्वमिदं समन्ततः ।
समुत्थितं व्याप्य, तथा प्रबोधिताः
प्राणा भवाब्धिं तरतां ततस्त्वया ॥११॥

अपूर्व्वतानं किमु विश्वमोहनम्
अहो त्वया गानमिदं प्रगीयते ।
तत् स्रोतसि प्रेममयस्तु कश्चन
महाप्लवः सम्प्रवहन्निवागतः ॥१२॥

क्षणं प्रतीक्षस्व सहैव याम्यहं
प्रेमप्लवे प्रेमपुरीं प्रति त्वया ।
वितीर्य्यते प्रेममयेण यत्र तु
प्रेमप्रसादः प्रतिमुष्टिपूरितम् ॥१३॥

प्रभुप्रसादोऽपि तव :प्रसादतः
नानाजनैर्भाग्यवशाद्धि लभ्यते ।
विहाय तत् प्रेमपुरीं कदाचन
मायापुरीं नैव पुनः प्रयान्ति ते ॥१४॥

त्वमेव मे जीवनसङ्गिनी तथा
त्वमेव वित्तं हृदयाधिवासितम् ।
त्वयैव सार्द्धं विजहामि सर्व्वथा
मायामयं सर्व्वमिदं जगत् प्रिये ॥१५॥

यद्वृक्षतः प्रेमफलं तु यत्त्वया
भुज्येत मह्यं ततएव किञ्चन ।
देयं यतो नश्वरजीवनं न मे
लभेत मृत्युं न जरापराभवम् ॥१६॥

पीयेत यन्निर्झरतस्त्वया जलं
दीयेत मह्यं च ततोऽपि किञ्चन ।
ततस्त्वशान्तं हृदयं प्रशान्तिमत्
भवेद् बुभुक्षाऽपसरेत्तथा तृषा ॥१७॥

वासः सुखं यत्र करिष्यते त्वया
कीयत्तु मह्यं ननु दास्यते ततः ।
तत्रैव ते पत्रपुटावृतः क्षणं
विश्रामयेयं किलदेहयष्टिकाम् ॥१८॥

निष्किञ्चनस्यार्त्त जनस्य हृद्गतं
वचःस्फुटं पक्षिणि ते निवेदितम् ।
तवैव कृत्वा ननु किङ्करं तु मां
त्वयैव सार्द्धं परिरक्षयेः सदा ॥१६॥

त्वद्गान-तानेन तु यन्ममासवो
निष्कास्य नीता अयि खेचराङ्गने ।
जानासि नैतत् किमु, केन चेतसा
विहाय मां दूरगता प्रगायसि ॥२०॥

एषा तु सांसारिकतीव्रयन्त्रणा
जातं ययोद्वेगविकम्पितं वपुः ।
दुःखावसन्नः श्रमकातरस्तथा
कथं ततो जीवनमावहाम्यहम् ॥२१॥

सुखेन नित्यं विषयोद्भवेन यद्
विशुष्ककण्ठोऽस्म्यथ वासनातृषा ।
मरीचिका-सम्प्रतिबद्ध-दर्शनो
नान्विष्य पन्थानमहं लभे पुनः ॥२२॥

त्यक्त्वाथवा पापपुरीं कथं जनो
गन्तुं ततः प्रेमपुरीं भवेदलम् ।
नूनं कथं लब्धुमलं भवेत्तथा
ज्योतिर्मयं दिव्यमणिं स्यमन्तकम् ॥२३॥

संसारवासो हि न रोचते मे
त्वं सादरं मां तु प्रदर्श्य मार्गम् ।
नयस्व यत्रास्ति सहस्रधारं
मन्दाकिनी प्रेमजला वहन्ती ॥२४॥

इति श्रीरघुनाथ-चौधारि-कविरत्न कृते केतकी-काव्ये
शास्त्र्युपनामाचार्य-श्रीमनोरञ्जनमिश्रकृत—
संस्कृतानुवादात्मके चतुर्थस्तरङ्गः ॥०॥

केतकी

अथ पञ्चमस्तरङ्गः

—*—

शेफालिका पुष्पचयैः सुसम्भृता
स्वज्ञन्यसौ दर्शनमागता पुनः ।
कालाङ्कितं यत्प्रकृतेरुरस्तलं
सम्पश्यतामेव समागता शरत् ॥१॥

गायन्त्यभीक्ष्णं दिवि या तु पक्षिणी
दूरंगतोत्पत्य न चागता पुनः ।
मायापुरीयं किल केतकीं विना
शून्येव सर्व्वाऽप्यनुभूयतेऽधुना ॥२॥

कान्ताहृता त्वं हृदयस्य बान्धवी
प्रगाय गानाढ्यमहो विहङ्गमे ।
ज्येष्ठा तवासौ भ्रमति त्वदर्थिनी
प्रत्येकशाखं खलु पट्टमाधवी[1] ॥३॥

---

१ । 'पट्टमाधवी' पक्षिविशेषो यः प्राक् 'सखीयती' नाम्नोल्लिखितः ।

न माधवी सौरभपुष्पगौरवै—
र्हसत्यसावुज्ज्वललास्यशालिनी ।
न कोकिलो वा सहकार-कानने
गायत्यथो पञ्चमतानपूरितम् ॥४॥

किंवा त्वया दुःखमलाभि दुःसहं
यतः समुत्पत्य गतं विहायसा ।
को नाम भावो हृदये समुत्थितः
त्वया विनासौ विगतो मधुस्वरः ॥५॥

आहूयसे सादरमेतयाऽय्र्यया
नूनं प्रकृत्या, दयिते ततस्त्वया
स्थित्वा दिनं तन्मृदुलाङ्कसंस्थिता
प्रगाय गीतार्द्धमितोऽथ गम्यताम् ॥६॥

त्वं दूरदेशं प्रति केन हेतुना
गता, तथा काचन तेऽस्ति सङ्गिनी ।
प्रत्यूहसालं कथमुत्तरिष्यसि—
क्लेशं प्रिये त्वं विविधं गमिष्यसि ॥७॥

मा गच्छ, मा, मा, दयिते सुवर्णिके
काकुर्मया ते क्रियतेऽथ याच्यसे।
सुधानिषेकेन विधाय शीतलं
दग्धं ममैतद्धृदयं, प्रयाह्यथ ॥८।

रुतं यथा स्वादु तथैव नाम ते
स्निह्याम्यहं त्वां प्रति भूरिशः प्रिये।
व्यक्तं समाख्याहि मनोगतं तु यत्
प्र।हि मां चाथ नय त्वया सह ॥९॥

अज्ञातपूर्व्वाऽसि मया विहङ्गमे
पथि स्थितं भिक्षुमवेक्ष्य मां पुनः।
प्रलोभयस्येवमथो न सादरं
करोषि सख्यं बहुकाकुयाचितम् ॥१०॥

नासीर्यदा त्वं ससुखं तदा स्थितं
मया, नतो चित्तमबोधि सर्व्वथा।
त्यक्ता तु मायाऽहमहो त्वयाऽप्यथो
त्यक्तस्ततो मे वद! का दशा भवेत् ॥११॥

अबोधिथास्त्वं खलु देवकन्यका
विद्याधरी स्वर्गत आगता स्वयम् ।
अबोधिथाः खेचरवेषधारिणी
प्रेमामृतं गीतिकयेह वर्षितुम् ॥१२॥

न वेत्त्यहो स्वर्गसमादरं नरो
न चापि ते कश्चिदुपासनाविधिम् ।
तुभ्यं पृथिव्यां खलु तेन हेतुना
मनुष्यसङ्गो नितरां न रोचते ॥१३॥

मोपागमो मां यदि ते न रोचे
दूरे तथा तिष्ठ, तदेव वाढम्।
दूरस्थिता गानसुधां निसिञ्चे-
स्तत् प्रेमखण्डं परिवेषयेश्च ॥१४॥

धन्यं तु ते पक्षिणि पक्षिजन्म
धन्यं च ते नाम विहङ्गकन्ये।
यावत्तु संसारवने भ्रमिष्ये
गुणस्य ते गानमहं करिष्ये ॥१५॥

इति श्रीरघुनाथचौधारिकविरत्न-कृतो 'केतकी'-
काव्ये शास्त्र्युपनामाचार्य श्रीमनोरञ्जनमिश्र
कृतसंस्कृतानुवादे पञ्चमस्तरङ्गः ॥०॥

—समाप्तश्चायं ग्रन्थः—

'केतकी' काव्यम्

श्रीरघुनाथचौधारिकविरत्नकृतमूलासमीय-
वाङ्मयादाचार्य-श्रीमनोरञ्जनशास्त्रिकृत-
संस्कृतानुवादात्मकम् ।